PS/UM-I/6/95-99/17

षष्ठपत्रम्

वेद

समयः घण्टात्रयम् पूर्णाङ्काः 100

अ. विंशतिः प्रश्नाः समाधेयाः। (20×2=40)

1. यजुर्वेदस्य प्रधानविषयः कः?
2. रुद्राष्टाध्यायीग्रन्थे कति अध्यायाः सन्ति?
3. रुद्राष्टाध्यायीग्रन्थे "पुरुषसूक्तम्" कस्मिनध्याये अस्ति?
4. गणानान्त्वा गणपति. . . . .इति मन्त्रं पूरयतु।
5. माध्यन्दिनशाखा कस्य वेदस्य अस्ति?
6. शिवसंकल्पसूक्तस्य प्रथमः मन्त्रः कः?
7. प्रथमाध्याये कति मन्त्राः सन्ति?
8. कति वेदाः भवन्ति?
9. यजुर्वेदस्य उपवेदः कः?
10. यज्ञेन यज्ञमयजन्त. . . . .देवाः।" इति मन्त्रं पूरयतु।
11. शतरुद्रियहोममन्त्राः कस्मिनध्याये सन्ति?
12. वेदपुरुषस्य मुखं किमस्ति?
13. कति स्वराः प्रमुखाः सन्ति?
14. षट्-वेदाङ्गानि कानि?
15. गायत्रीमन्त्रं लिखत।
16. अनुदात्तस्वरस्य स्थानं कुत्र भवति?
17. कस्य देवस्य प्राधान्यमस्ति रुद्राष्टाध्यायी ग्रन्थे?
18. पुरुषसूक्तस्य आदिमः मन्त्रः कः?

19. "श्रीश्चते लक्ष्मीश्च. . . . .इषाण।" इति मन्त्रं पूरयत।

20. स्वरितस्वरस्य स्थानं कुत्र भवति?

21. रुद्रसूक्ते कति मन्त्राः?

22. कः देवो याति भुवनानि पश्यन्?

23. अप्रतिरथसूक्ते कति मन्त्राः?

24. स्वरितस्य कृते कीदृशं चिह्नमपेक्षते?

25. "अबोध्यग्निः" इति मन्त्रस्य ऋषिः कः?

ब. पञ्च प्रश्नाः समाधेयाः। (8×5=40)

21. "गायत्री...........शम्म्यन्तुत्वा॥" इति मन्त्रं सस्वरं पूरयत।

22. "यज्जाग्रतो...........शिवसंकल्पमस्तु॥" इति मन्त्रं सस्वरं पूरयत।

23. "सहस्रशीर्षा....,......दशाङ्गुलम्॥" इति मन्त्रं सस्वरं पूरयत।

24. "व्वेदाहमेतं...........विजायते॥" इति मन्त्रं सस्वरं पूरयत।

25. "अभिगोत्राणि...........प्रयुत्सु॥" इति मन्त्रं सस्वरं पूरयत।

26. "मर्म्माणिते...........मदन्तु॥" इति मन्त्रं सस्वरं पूरयत।

27. "उदुत्त्यञ्जात...........सूर्य्यम्॥" इति मन्त्रं सस्वरं पूरयत।

28. "अद्यादेवा...........उत द्यौः॥" इति मन्त्रं सस्वरं पूरयत।

स. कश्चन एकः प्रश्नः समाधेयः। (1×20=20)

29. रुद्राष्टाध्यायी ग्रन्थस्य द्वितीयाध्यायस्य आदितः पञ्चमन्त्राः सस्वरं लेखनीयाः।

**अथवा**

शिवसंकल्पसूक्तं सस्वरं लिखत।

PS/UM-I/6/96/17

षष्ठपत्रम्

नव्यव्याकरणम्

समयः घण्टात्रयम् पूर्णाङ्काः 100

अ. सर्वे प्रश्नाः समाधेयाः। (20×2=40)

1. कति माहेश्वरसूत्राणि?

अथवा

हकारादिषु अकारः किमर्थः?

2. सवर्णसञ्ज्ञाविधायकं सूत्रं किम्?

3. 'हलन्त्यम्' इति सूत्रस्यार्थं लिखत।

4. स्वरितसञ्ज्ञाविधायकं सूत्रं किम्?

5. किन्नाम उपदेशत्वम्?

अथवा

रप्रत्याहारे कयोः वर्णयोः समावेशः?

6. केषां वर्णानाम् उच्चारणस्थानं मूर्धा भवति?

7. प्रयत्नाः कति? के च ते?

8. गुणसन्धेः एकम् उदाहरणं लिखत।

अथवा

'भूवादयो धातवः' अस्य सूत्रस्यार्थः कः?

9. 'स्थानेऽन्तरतमः' इति सूत्रस्यार्थं लिखत ?

10. अज्झल्वर्णानां सवर्णसञ्ज्ञायाः निषेधः केन सूत्रेण भवति ?

अथवा

विभाषासञ्ज्ञा कयोः भवति ?

11. न पदान्तद्विर्वचन० सूत्रमिदं पूरयत।

12. 'अचो रहाभ्यां द्वे' इति सूत्रस्य उदाहरणं किम् ?

13. अयादिसन्धिविधायकं सूत्रं किम् ?

14. 'अन्तादिवच्च' इति सूत्रस्यार्थं लिखत।

15. 'एङि पररूपम्' इति सूत्रस्य उदाहरणं लिखत।

16. 'दैत्यारिः' इत्यत्र कः सन्धिः ? केन च सूत्रेण ?

17. 'हरी एतौ' इत्यत्र प्रगृह्यसञ्ज्ञाविधायकं सूत्रं किम् ?

18. श्चुत्वसन्धिविधायकं सूत्रं किम् ?

अथवा

'झलां जशोऽन्ते' इति सूत्रस्य उदाहरणं लिखत।

19. 'नादिचि' इति सूत्रेण किं विधीयते ?

20. 'सोऽपदादौ' अस्य सूत्रस्याऽर्थः कः ?

**ब. सर्वे प्रश्नाः समाधेयाः।** (5×8=40)

21. सिद्धान्तकौमुद्याः मङ्गलाचरणं विलिख्य तस्य व्याख्या कार्या।

अथवा

'पूर्वत्रासिद्धम्' इति सूत्रस्य सोदाहरणं व्याख्या कार्या।

22. उपेन्द्रः, गङ्गौघः, श्रीशः, पावकः एतेषां प्रयोगाणां ससूत्रं सिद्धिर्विधेया।

23. सुध्युपास्यः, गव्यम् अनयोः ससूत्रं सिद्धिर्विधेया।

अथवा

'इको गुणवृद्धी' इति सूत्रस्य सोदाहरणं व्याख्या कार्या।

24. सच्चित्, रामष्षष्ठः, एतन्मुरारिः हरिं वन्दे एतेषां प्रयोगाणां ससूत्रं सिद्धिर्विधेया।

25. विष्णुस्त्राता, हरेऽव, विष्णू इमौ, हरिः शेते एतेषां प्रयोगाणां ससूत्रं सिद्धिर्विधेया।

अथवा

प्रकृतिभावस्य सूत्रं विलिख्य सोदाहरणं व्याख्यायताम्।

स. **अधोलिखितः प्रश्नः समाधेयः।** (1×20=20)

26. अच्सन्धेः प्रमुखभेदान् सूत्रोदाहरणपूर्वकं व्याख्यात।

अथवा

स्थानिवद्भावविधायके सूत्रे विलिख्य तयोः सोदाहरणं व्याख्या कार्या।

अथवा

अनुस्वार-परसवर्णयोः उदाहरणानि ससूत्रं सिद्धान्तकौमुदीग्रन्थानुसारेण प्रदर्शयत।

षष्ठपत्रम्

साहित्यम्

पूर्णाङ्काः 10

समयः घण्टात्रयम् (20×2=40)

अ. सर्वे प्रश्नाः समाधेयाः ।

1. "काव्यालङ्कारः" इति ग्रन्थस्यास्य कर्त्ता कः ?
2. प्रथमपरिच्छेदस्य नाम किमस्ति ?
3. "सर्वज्ञः" कः ?
4. काव्यालङ्कारस्य मङ्गलाचरणं कीदृशं मङ्गलाचरणं वर्तते ?
5. कं प्रणम्य ग्रन्थकारः काव्यालङ्कारस्य रचनां करोति ?
6. कविः कथं कीर्तिं प्राप्नोति ?
7. काव्यं कस्य कदा च जायते ?
8. अधनस्य दातृत्वमिव कस्य शास्त्रवेदनम् निष्फलं भवति ?
9. कथं जडधियोऽपि कश्चित् शास्त्रम् अध्येतुं समर्थो भवति ?
10. कस्य काव्यमयं वपुः अक्षयं भवति ?
11. दुस्सुतेन इव कः निन्दनीयः भवति ?
12. चतुर्वर्गे के के सन्ति ?
13. भाषादृष्ट्या काव्यं कतिविधम् ?

**अथवा**

गूढशब्दाभिधानदोषस्य लक्षणं किम् ?

14. विवक्षितार्थस्य प्रतीतिर्व्यवधानेन यत्र भवति तत्र कः दोषः भवति ?

15. सर्गबन्धः किमुच्यते ?

**अथवा**

"अजिहलदत्" इति कस्य दोषस्योदाहरणं वर्तते ?

16. शशिना विना का न शोभते ?

**अथवा**

महाकाव्ये कस्य वधं न ब्रूयात् ?

17. कथा-आख्यायिकयोर्मध्ये उच्छ्वासयुक्ता काऽस्ति ?

**अथवा**

"क्रीडायां विकृतं च तत्" कस्य दोषस्य इदमुदाहरणं वर्तते ?

18. "वैदर्भमन्यदस्तीति मन्यते सुधियोऽपरे" अत्र सुधियः इति शब्दस्यार्थः कः ?

**अथवा**

"विजह्रुस्तस्य ताः शोकम्" कस्य दोषस्योदाहरणमस्ति ?

19. "कल्पनादुष्ट" दोषः कुत्र भवति ? .

20. "शौर्याभरणम्" कस्य दोषस्योदाहरणमस्ति ?

**ब. केचन पञ्च प्रश्नाः समाधेयाः।** (5×8=40)

21. आचार्यभामहानुसारेण काव्यप्रयोजनं विशदयत।

22. "अधनस्येव दातृत्वं क्लीबस्येवास्त्रकौशलम्" अज्ञस्येव प्रगल्भत्वमकवेः शास्त्रवेदनम्" व्याख्या कार्या।

23. नेयार्थदोषस्य लक्षणमुदाहरणञ्च लिखत।

अथवा

"अतोऽभिवाञ्छता कीर्त्तिं स्थेयसीमाभुवः स्थितेः,
यत्नो विदितवेद्येन विधेयः काव्यलक्षणः" व्याख्यायताम्।

24. "कल्पनादुष्ट" दोषं सोदाहरणं निरूपयत।

अथवा

शब्दाऽभिधेये विज्ञाय कृत्वा तद्विदुपासनाम्।
विलोक्याऽन्यनिबन्धांश्च कार्यः काव्यक्रियादरः॥
व्याख्या कार्या।

25. आख्यायिका सलक्षणं निरूपणीया।

अथवा

"रूपकादिरलङ्कारस्तस्यान्यैर्बहुधोदितः।
न कान्तमपि निर्भूषं विभाति वनितामुखम्॥"
इति कारिकाया व्याख्या कार्या।

स. एकः प्रश्नः समाधेयः। (1×20=20)

26. आचार्यभामहानुसारं विस्तरेण महाकाव्यं निरूपयत।

अथवा

संक्षेपेण भामहकृतः काव्यभेदः निरूपणीयः।

अथवा

भामहानुसारं काव्यस्य स्वरूपं कारणञ्च विस्तरेण प्रतिपादयत।

# PS/UM-I/6/98/17

## षष्ठपत्रम्

## ज्योतिषम्

समयः घण्टात्रयम् पूर्णाङ्काः 100

अ. अतिलघूत्तरप्रश्नाः (20×2=40)

(क) जन्मपत्रदीपकम्

सर्वे प्रश्नाः समाधेयाः। (12×2=24)

1. जन्मपत्रदीपकस्य रचयिता कः?

2. सूर्योदयाद्यातकालं किं प्रकीर्तितम्?

**अथवा**

'खाब्धि' शब्देन का संख्या गृह्यते?

3. का नाम पलभा?

4. मेषराशेः लङ्कोदयमानं किम्?

5. भूनेत्रवेदशब्देन का संख्या गृह्यते?

6. लग्ने षड्राशियोजनेन कः भावः प्राप्यते?

**अथवा**

ग्रहः कदा दीप्तावस्थायां भवति?

7. एकस्य नवमांशस्य मानं कियत् भवति?

8. स्थिरराशयः के?

9. सिंहराशेः स्वामीग्रहः कः?

10. 'कुजः' कस्य ग्रहस्य संज्ञा भवति?

11. सूर्यस्य विंशोत्तरीदशामानं कियत् भवति?

अथवा

ग्रहः कदा प्रभुदितावस्थायां भवति?

12. समराशौ प्रथमहोरा कस्य ग्रहस्य भवति?

## (ख) रेखागणितम्

**अधोलिखितेषु सर्वे प्रश्नाः समाधेयाः।** (8×2=16)

13. समकोणस्य लक्षणं लिखत।

14. किं नाम केन्द्रम्?

15. त्रिभुजस्य लक्षणं लिखत।

अथवा

का नाम रेखा?

16. जात्यत्रिभुजस्य लक्षणं किम्?

17. अधिकोणस्य लक्षणं लिखत।

18. व्यासरेखा का?

19. किं नाम समान्तरचतुर्भुजम्?

अथवा

वृत्तस्य परिभाषा का?

20. चतुर्भुजस्य लक्षणं किम्?

ब. लघूत्तरप्रश्नाः (5×8=40)

(क) जन्मपत्रदीपकम्

सर्वे प्रश्नाः समाधेयाः। (3×8=24)

21. यदि पलभा 6/30 तदा चरखण्डसाधनं वर्णयत।

22. यदि शकसंवत् 1930 भवेत्तदा अयनांशसाधनं कुरुत।

अथवा

सोदाहरणं नवांशसाधनं वर्णयत।

23. पञ्चधामैत्रीसाधनं वर्णयत।

अथवा

ग्रहाणां पारिजातादिवर्गान् निरूपयत।

(ख) रेखागणितम्

सर्वे प्रश्नाः समाधेयाः। (2×8=16)

24. अभीष्टरेखायाः समानं खण्डद्वयं कथं कर्त्तव्यमिति वर्णयत।

25. "त्रिभुजे बृहद्भुज सम्मुखकोणो लघुभुजसम्मुख-कोणादधिको भवति।" इति उपपाद्यताम्।

अथवा

निर्दिष्टरेखोपरि वर्गक्षेत्रं कथं कर्त्तव्यमिति प्रतिपादयत।

स. निबन्धात्मकप्रश्नाः।

द्वौ प्रश्नौ समाधेयौ। (2×10=20)

26. यदि भयातमानं 35′/20″, भभोगमानं 62′/10″, जन्मनक्षत्रं श्रवणं भवेत्तदा सश्लोकं चन्द्रस्पष्टसाधनं कुरुत।

अथवा

गुरुमहादशायां सर्वेषां ग्रहाणाम् अन्तर्दशासाधनं सश्लोकं वर्णयत।

27. "जात्यत्रिभुजे भुजकोटिवर्गयोगः कर्णवर्गसमो भवति।" इति उपपाद्यताम्।

अथवा

रेखागणितग्रन्थमधिकृत्य संक्षिप्तनिबन्धः लेख्यः।

षष्ठपत्रम्

सर्वदर्शनम्

समय: घण्टात्रयम्　　　　　　　　　　　　पूर्णाङ्का: 100

अ. अतिलघूत्तरीया प्रश्ना: सर्वेऽपि समाधेया:। (2×20=40)

1. तर्कसंग्रहस्य मङ्गलाचरणं लिखत।
2. द्रव्याणि कति सन्ति? कानि च तानि?
3. सामान्यं कति विधम्? कानि च तानि?
4. अपां किं लक्षणम्?
5. तेजस: किं लक्षणम्?
6. दिश: किं लक्षणम्?
7. मनस: लक्षणं लिखत।
8. रस: कतिविध:? के च ते?
9. स्पर्शस्य किं लक्षणम्?
10. संख्याया: किं लक्षणम्?
11. परिमाणं कतिविधम्? के च ते?
12. गुरुत्वस्य किं लक्षणम्?
13. शब्द: कतिविध:? के च ते?
14. यथार्थानुभवस्य किं लक्षणम्?

15. करणस्य किं लक्षणम्?

16. असमवायिकारणस्य किं लक्षणम्?

अथवा

किं नाम सविकल्पकम्?

17. शब्दत्व-साक्षात्कारे कः सन्निकर्षः?

अथवा

लिङ्गं कतिविधम्? के च ते?

18. सपक्षस्य किं लक्षणम्?

अथवा

सत्प्रतिपक्षहेत्वाभासस्य किं लक्षणम्?

19. असिद्धो हेत्वाभासः कतिविधः? के च ते?

अथवा

अयथार्थानुभवः कतिविधः? के च ते?

20. स्मृतिः कतिविधा? नामानि लिखत।

अथवा

उत्क्षेपणस्य किं लक्षणम्?

ब. लघूत्तरीया प्रश्नाः सर्वेऽपि समाधेयाः। (5×8=4

21. कति गुणाः सन्ति? तेषां नामानि लिखत।

22. ग्रन्थानुसारं तेजसः निरूपणं कुरुत।

23. वायुनिरूपणं यथाशास्त्रं वर्णयत।

अथवा

किं नाम प्रत्यक्षम्? संक्षेपेण प्रतिपादयत।

24. किं नाम अनुमानम्? वर्णयत।

अथवा

अवयवाः कति? नामानि विलिख्य प्रतिपादयत।

25. संक्षेपेण असिद्धहेत्वाभासस्य उपस्थापनं कुरुत।

अथवा

समवायः कः इति प्रतिपादयत?

स. दीर्घोत्तरीयाः प्रश्नाः। (1×20=20)

26. नवद्रव्याणि कानि? शास्त्रानुसारं वर्णयत्त।

अथवा

यथाशास्त्रं हेत्वाभासः निरूपणीयः। गुणानां भेदाः वर्णनीयाः।

# षष्ठपत्रम्

# जैनदर्शनम्

समय: घण्टात्रयम् | पूर्णाङ्का: 100

अ. यथारुचि केचन विंशति: प्रश्ना: समाधेया: । (20×2=40)

1. परीक्षामुखसूत्रं केन लिखितम्?
2. परीक्षा कथं संभवति?
3. परीक्षामुखसूत्रे कति समुद्देशा: सन्ति?
4. परीक्षामुखस्य द्वितीये समुद्देशे प्रत्यक्षप्रमाणस्य वर्णनं विद्यते परोक्षप्रमाणस्य वा?
5. परोक्षप्रमाणस्य जैनमते कति भेदा: निरूपिता:?
6. 'दृष्टोऽपि समारोपात्तादृक्" इत्यत्र समारोपस्य कोऽर्थ:?
7. जैनपरम्परायां प्रमाणं स्वपरप्रकाशकं भवति परप्रकाशकम् वा?
8. तर्कात् किं क्रियते?
9. "न चासिद्धवदिष्टं प्रतिवादिन:" इति सूत्रं स्पष्टयत?
10. हेतोरूपसंहार: उपनय: इत्यस्य कोऽर्थ:?
11. स्वार्थमुक्तलक्षणम् इति सूत्रं स्पष्टयत?
12. हेतो: लक्षणं किमस्ति जैनमते?

13. अविरुद्धानुपलब्धिः प्रतिषेधे सप्तधा भवति पञ्चधा वा ?

14. "नास्यत्र शिंशपा वृक्षानुपलब्धेः" इत्यत्र हेतुवचनं किम् ?

15. अन्वयव्याप्तिः अवबोधनीया ?

16. "आप्तवाक्यादिनिबन्धनम्" इत्यत्र के आप्ताः ज्ञातव्याः ?

17. स्मृतिः प्रमाणं के न मन्यन्ते ?

18. "सामान्यं द्वेधा तिर्यगूर्ध्वताभेदात्" इत्यस्य अर्थः लेखनीयः ?

19. पर्यायाः क्रमभाविनः भवन्ति इति सत्यमसत्यं वा ?

20. अनुमानाभासः कथं भवति ?

21. प्रत्यक्षबाधितं साध्यं भवेत् न वा भवेत् ?

22. यथाऽनुष्णोऽग्निः द्रव्यत्वात् इत्यत्र को दोषः ?

23. बालप्रयोगाभासाः कथं स्युः ?

24. "सम्यग्ज्ञानं प्रमाणम्" इत्यत्र सम्यक् पदेन कस्य निरासः क्रियते ?

25. "तत्रानिष्ट्यादिः पक्षाभासः" इत्यस्य अर्थः कः ?

**ब. अधोलिखितप्रश्नेषु केचन पञ्च प्रश्नाः समाधेयाः ?**

(5×8=40)

26. प्रत्यक्षप्रमाणं पाठ्यग्रन्थदिशा विवेचयत ?

27. प्रत्यभिज्ञानं सभेदं निरूपयत ?

28. अनुमानप्रमाणं समवबोधयत ?

29. प्रमाणस्य विषयः पाठ्यग्रन्थानुसारेण लिखत ?

30. हेत्वाभासः सभेदं निरूपयत ?

31. अनिश्चितोऽपूर्वार्थः इति सूत्रं विवेचयत ?

32. अविनाभावसम्बन्धः कः ? स्पष्टीक्रियताम्।

33. अनुमानस्य पञ्च अवयवाः पाठ्यग्रंथदिशा विवेचनीयाः ?

**स. कमपि प्रश्नमेकं निबन्धशैल्यां समादधत ? (1×20=20)**

34. प्रमाणलक्षणस्य समीक्षा कार्या ?

**अथवा**

35. प्रमाणफलं पाठ्यग्रन्थनुसारेण लिखत ?

**अथवा**

36. परीक्षामुखसूत्रस्य विषयः स्वसंस्कृतगिरा प्रतिपादनीयः ?

षष्ठपत्रम्

बौद्धदर्शनम्

समयः घण्टात्रयम्

पूर्णाङ्काः 100

अ. सर्वे प्रश्नाः समाधेयाः। (20×2=40)

1. त्रीणि रत्नानि कानि?

2. बोधिसत्त्वानां कति बलानि सन्ति?

अथवा

कति कुशलमूलानि?

3. नैरात्म्यद्वयं किम्?

4. कति अनुव्यञ्जनानि?

अथवा

कति यानानि? कानि च तानि?

5. चत्वारः ब्रह्मविहाराः के?

6. त्रीण्यकुशलमूलानि कानि?

7. धर्मसङ्ग्रहग्रन्थस्य लेखकः कः?

8. 'संज्ञा' इत्यस्य पदस्य कोऽर्थः?

9. कति अभिज्ञाः? के च ते?

10. कति पारमिताः? काश्च ताः?

11. उपादानस्कन्धाः कति सन्ति? के च ते?

12. माध्यमिकदर्शनस्य प्रवर्तकः कः?

13. चत्वारो माराः के सन्ति लिखत।

14. सत्यद्वयं किम्?

15. षट्क्लेशाः के?

अथवा

सम्भारद्वयं किम्?

16. शिक्षाः कतिधा? काश्च ताः?

17. कति बोध्याङ्गानि?

अथवा

चत्वारि आर्यसत्यानि कानि?

18. कति भौतिकानि? कानि च तानि?

19. रसः कतिधा? के च ते?

20. त्रिविधाः वेदनाः काः?

ब. सर्वे प्रश्नाः समाधेयाः। (5×8=40)

21. अधीतग्रन्थदिशा प्रतीत्यसमुत्पादस्य अङ्गाः प्रतिपादनीयाः।

22. धातुपदस्य अर्थं विलिख्य यथाग्रन्थनयेन अष्टादशधातवः लेखनीयाः?

अथवा

द्वादशायतनानि यथाग्रन्थनयेन प्रतिपादनीयानि।

23. चतुर्दश अव्याकृतवस्तूनि लिखत।

अथवा

चत्वारि आर्यसत्यानि तेषां षोडशाकारान् च लिखत।

24. बोधिसत्त्वानां दशबलान् लिखत।

अथवा

आर्याष्टाङ्गिकमार्गः यथाग्रन्थदिशा लेखनीयः।

25. सप्त तथागताः यथाग्रन्थनयेन लेखनीयाः।

स. कश्चन एकः प्रश्नः समाधेयः। (1×20=20)

26. धर्मसङ्ग्रहकारस्य देशकालकृतीनां परिचयो देयः।

अथवा

बौद्धदर्शनस्य वैशिष्ट्यं लेखनीयम्।

अथवा

धर्मसङ्ग्रहग्रन्थस्य विषयवस्तु किम्? विवृणुत॥

षष्ठपत्रम्

# काश्मीरशैवदर्शनम्

समयः घण्टात्रयम् पूर्णाङ्काः 100

अ. अधोलिखितेषु विंशतिः प्रश्नाः समाधेयाः। (20×2=40)

1. शिवस्तोत्रावली कस्य कृतिः?
2. महेश्वरस्य प्रियतमा देवी का अस्ति?
3. शिवमार्गो मायायुक्तो रहितो वा?
4. शङ्करशब्दस्य कोऽर्थः?
5. संसारं प्रति शिवस्य कीदृक्कारणत्वम्?
6. के देवर्षयः सन्ति?
7. 'स्वर्धुनीस्रोतः' इत्यस्य कोऽर्थः?
8. निःशेषपुरुषाश्रयः महापुरुष एकोऽनेके वा?
9. संसारार्णवः केषां क्रीडामहासरः।
10. कति ऐश्वर्याणि?
11. उत्पलदेवस्य मातुर्नाम किमासीत्?
12. समाधिः कतिविधः?
13. सहस्रसूर्यकिरणाद् अधिकप्रकाशयुक्तः कः?
14. प्रथमशैवदर्शनग्रन्थः कोऽस्ति?

15. ईश्वरप्रत्यभिज्ञा कस्य कृतिः?

अथवा

रामकण्ठः कस्य शिष्य आसीत्?

16. सम्वादात्मकशास्त्रं किमस्ति?

अथवा

आचार्य-सोमानन्दकृतो ग्रन्थस्य नाम किमस्ति?

17. स्पन्दकारिकायां कति कारिका सन्ति?

अथवा

शिवसूत्रवृत्तिकारः कः?

18. अविद्यादिक्लेशतः मुक्तः कः?

अथवा

'त्रिक'पदेन केषां ग्रहणम्?

19. कति शक्तयः? काश्च ताः?

अथवा

शारदालिप्यां स्वरवर्णान् लिखत।

20. 'क' इत्यस्य शारदाक्षररूपं लिखत।

**ब. अधोनिर्दिष्टेषु पञ्चप्रश्नानामुत्तराणि प्रदेयानि।(5×8=40)**

21. 'न ध्यायतो न जपतः. . . . .नुमो भक्तिशलिनम्' इति स्तोत्रं व्याख्यात।

22. शिवस्य सर्वव्यापकत्वमुपस्थापयत।

अथवा

'अमाये शिवमार्गेऽस्मिन् भक्तिरेका प्रशस्यते' इति पङ्क्तेः रहस्यमुद्घाटयत।

23. भक्तेः मोक्षहेतुत्वं साधयत।

24. शिवस्य एकत्वं महापुरुषत्वञ्च साधयत।

अथवा

शैवदर्शनाभिमतसत्कार्यवादमुपस्थापयत।

25. मायातत्त्वं विवृणुत।

अथवा

परमेश्वरस्य स्वरूपं वर्णयत।

स. कस्याप्येकस्य उत्तरं देयम्। (1×20=20)

26. काश्मीरशैवदर्शनस्य वैशिष्ट्यं प्रतिपादयत।

अथवा

शिवस्य स्वरूपमुपस्थापयत।

अथवा

शैवदर्शनस्य प्राचीनत्वं साधयत।